"अत्रेः कान्तारभवा" इति । अधिकं सप्तर्षि शब्दे दृश्यम् । अद्—त्रिनि । अतीत्यप्यत्र उणादि० ।

**अत्रिजात** पु० अत्रेर्नेत्रात् जातः जन—क्त ५त० । चन्द्रे, चन्द्रो हि प्रजासर्गार्थं तपस्यतोऽत्रेर्नेत्रात् जातो यथा । "पिता सोमस्य वै राजन् जज्ञेऽत्रिर्भगवानृषिः । ब्रह्मणो मानसात् पूर्व्वं प्रजासर्गं विधित्सतः । तत्रात्रिः सर्व्वभूतानां तस्थौ स्वतनयैर्वृतः । कर्म्मणा मनसा वाचा शुभान्येव चचार सः । अहिंस्रः सर्वभूतेषु धर्म्मात्मा शंसितव्रतः । काष्ठकुड्यशिलाभूत ऊर्द्ध्वबाहुर्म्महाद्युतिः । अनुत्तरं नाम तपो येन तप्तं महत् पुरा । त्रीणि वर्षसहस्राणि दिव्यानीति ह नः श्रुतम् । तत्रोर्द्ध्वरेतसस्तस्य स्थितस्यानिमिषस्य ह । सोमत्वं तनुरापेदे महासत्त्वस्य भारत । ऊर्द्ध्वमाचक्रमे तस्य सोमत्वं भावितात्मनः । नेत्राभ्यां वारि सुस्राव दशधा द्योतयन् दिशः । तं गर्भविधिना हृष्टा दश देव्यो दधुस्तदा । समेत्य धारयामासुर्न च ताः समशक्नुवन् । स ताभ्यः सहसैवाथ दिग्भ्यो गर्भः प्रभान्वितः । पपात भासयन् लोकान् शीतांशुः सर्वभावनः । यदा न धारणे शक्तास्तस्य गर्भस्य ता दिशः । ततस्ताभिः सहैवाशु निपपात वसुन्धराम् । पतितं सोममालोक्य ब्रह्मा लोकपितामहः । रथमारोपयामास लोकानां हितकाम्यया । स हि वेदमयस्तात ! धर्म्मात्मा सत्यसङ्गरः । युक्तो वाजिसहस्रेण सितेनेति हि नः श्रुतम् । तस्मिन्निपतिते देवाः पुत्रेऽत्रेः परमात्मनि । तुष्टुवुर्ब्रह्मणः पुत्रा मानसाः सप्त ये श्रुताः इति हरिवंशे ।

**अत्रिदृग्ज** पु० अत्रेर्दृशोनेत्राज्जायते जन—ड ५त० । चन्द्रे अत्रिनेत्रजादयोऽप्यत्र । तद्विवृतिरत्रिजशब्दे दृश्यम् ।

**अत्रिभारद्वाजिका** स्त्री अत्रिभारद्वाजवंशयोः मैथुनम् "द्वन्द्वाद्वुन् वैरमैथुनयोरिति" वुन् "वैरमैथुनकादिषु" स्त्रित्यमरोक्तेः स्त्रीत्वम् । तद्वंशजातयोः स्त्रीपुंसयोर्मैथुने ।

**अत्रिसंहिता** स्त्री अत्रेः संहिता स्मृतिः । वर्णाश्रमाचारादिबोधके अत्रिप्रणीते धर्मशास्त्रभेदे ।

**अत्वरा** स्त्री न त्वरा शीघ्रम् अभावार्थे न०त० । त्वराभावे "त्रीणि श्राद्धे प्रशंसन्ति शौचमक्रोधमत्वरामिति" स्मृतिः ।

**अत्सरुक** पु० नास्ति त्सरुरिव मुष्टिबन्धनस्थानं यस्य । मुष्टिबन्धनस्थानशून्ये खड्गाकारे यज्ञियपात्रभेदे चमसे ।

**अथ** अव्य० चु०-अर्थ-ड पृषो० रलोपः । संशये, आरम्भे आनन्तर्य्ये, प्रश्ने, विकल्पे, प्रकरणे, समुच्चये पक्षान्तरे च । मङ्गलं तु नास्यार्थः किन्तु अर्थान्तरप्रयुक्तोऽप्ययं श्रुत्या मङ्गलसाधनं भवति । "ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा । कण्ठं भित्त्वा विनिर्यातौ तेन माङ्गलिकावुभा" वित्युक्तेस्तस्य श्रवणेन मङ्गलसाधनत्वम् अतएव शारीरकभाष्ये "अर्थान्तरप्रयुक्तोऽथशब्दः श्रुत्या मङ्गलमारचयती" त्युक्तम् । तत्र "अथातो ब्रह्मजिज्ञासेत्यादौ" साधनचतुष्टयानन्तर्य्यार्थे "अथ प्रजानामधिप" इत्यादौ चानन्तर्य्ये, "अथ योगानुशासन" मित्यत्र अधिकाररूपारम्भे "शब्दोनित्यः अथानित्य" इत्यादौ संशये, संशयस्य एकधर्म्मिकं कोटिद्वयज्ञानं तत्र कोट्युपस्थापनस्य संशयहेतुत्वात् प्रकृते तस्यैव संशयशब्दार्थता विकल्पस्य संशयविशेष एव । "अथ शक्नोषि भोक्तुमित्यादौ" प्रश्ने, "अथ शब्दानुशासनमित्यत्र मङ्गलार्थतयोपादानमर्थस्तु अधिकार एव "अथ मरणमवश्यमेव जन्तोरिति" वेण्याम्, "अथ चेत्त्वमिमं धर्म्यं संग्रामं न करिष्यसीत्यादौ गीतायां च पक्षान्तरे, अथातो धर्मं व्याख्यास्याम इत्यादौ कात्स्न्र्ये, "भीमोऽथार्ज्जुन" इत्यादौ समुच्चये, स्वरादिपाठादस्याव्ययत्वम् ।

**अथकिम्** अव्य० अथ+कायतेः कवतेर्वा बा० डिमि । स्वीकारे । स्वीकारस्येह नादानं, किन्तु अन्योक्तपदार्थस्य वक्तुः तथात्वेनाभ्युपमात्मकज्ञानम्, तत्र द्योतकत्वमस्य शब्दस्य, यथा कस्यचित् "इत्थं वृत्तमिति" प्रश्ने अथकिमित्यादिना पृष्टवस्तुनः यथावृत्तत्वाभ्युपगमः स च वक्तुरेव ।

**अथर्वण** पु० अथर्वा तदुक्तविद्याऽस्त्यस्य ज्ञातत्वात् अच् पृ० न टिलोपः । शिवे, त्रिकाण्ड० ।

**अथर्वणि** पु० अथर्वणि तदुक्तशान्त्यादौ कुशलः बा० इस् सित्त्वेन भत्वाभावात् न टिलोपः । अथर्ववेदोक्तकर्म्माभिज्ञे ब्राह्मणे पुरोहिते च मेदिनिः ।

**अथर्वन्** पु० अथ+ऋ—वनिप् शक० । अथर्व्वनामकमुनिविशेषे, स च कल्पभेदे ब्रह्मणो ज्येष्ठः पुत्रः यथोक्तं मुण्डके । "ब्रह्मा देवानां प्रथमं संबभूवे" त्युपक्रम्य ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राहेत्युक्तम्" "अनेकेषु ब्रह्मणः सृष्टिप्रकारेषु अन्यतमस्य सृष्टिप्रकारस्य मुखे अयमथर्वा सृष्ट" इति भाष्यम् । "अथर्वणे यां प्रवदेत ब्रह्माथर्वा पुरोवाचाङ्गिरे इति" अथर्वायेत्युक्तेः अथर्वशब्दोऽदन्तोऽपि "सर्वे नान्ता अदन्ताः स्युरित्युक्तेः" पृषो० नलोपः । अथर्वणाऽधीतत्वात् वेदभेदे पु० । ततः तद्वेदाधीते वा ठक् आथर्वणिकः, अथर्वणा दृष्टं साम अण् आथर्वणम् । तेन प्रोक्तम् अधीयते क्ततठको लुक् । अथर्वाणः । तत्प्रोक्ताध्यायिप्रभृतिष्वर्थेषु ।